# Shri Bhairavi Kavacham

# શ્રીભૈરવીકવચમ્

## Document Information

Text title : bhairavIkavacham

File name : bhairavIkavacham.itx

Category : devii, kavacha, dashamahAvidyA, devI

Location : doc_devii

Proofread by : lalitha parameswari parameswari.lalitha at gmail.com

Description/comments : shAktapramodaH, rudrayAmalatantra

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીભૈરવીકવચમ્

શ્રીપાર્વત્યુવાચ -
દેવદેવ મહાદેવ સર્વશાસ્ત્રવિશારદ ।
કૃપાઙ્કુરુ જગન્નાથ ધર્મજ્ઞોઽસિ મહામતે ॥ ૧॥

ભૈરવી યા પુરા પ્રોક્તા વિદ્યા ત્રિપુરપૂર્વિકા ।
તસ્યાસ્તુ કવચન્દિવ્યં મહ્યઙ્કુથય તત્ત્વતઃ ॥ ૨॥

તસ્યાસ્તુ વચનં શ્રુત્વા જગાદ જગદીશ્વરઃ ।
અદ્ભુતઙ્કવચન્દેવ્યા ભૈરવ્યા દિવ્યરૂપિ વૈ ॥ ૩॥

ઈશ્વર ઉવાચ -
કથયામિ મહાવિદ્યાકવચં સર્વદુર્લભમ્ ।
શ‍ૃણુષ્વ ત્વઞ્ચ વિધિના શ્રુત્વા ગોપ્યન્તવાપિ તત્ ॥ ૪॥

યસ્યાઃ પ્રસાદાત્સકલં બિભર્મિ ભુવનત્રયમ્ ।
યસ્યાઃ સર્વં સમુત્પન્નયસ્યામદ્યાપિ તિષ્ઠતિ ॥ ૫॥

માતા પિતા જગદ્ધન્યા જગદ્બ્રહ્મસ્વરૂપિણી ।
સિદ્ધિદાત્રી ચ સિદ્ધાસ્સ્યાદસિદ્ધા દુષ્ટજન્તુષુ ॥ ૬॥

સર્વભૂતહિતકરી સર્વભૂતસ્વરૂપિણી ।
કકારી પાતુ માન્દેવી કામિની કામદાયિની ॥ ૭॥

એકારી પાતુ માન્દેવી મૂલાધારસ્વરૂપિણી ।
ઇકારી પાતુ માન્દેવી ભૂરિ સર્વસુખપ્રદા ॥ ૮॥

લકારી પાતુ માન્દેવી ઇન્દ્રાણી વરવલ્લભા ।
હ્રીઙ્કારી પાતુ માન્દેવી સર્વદા શમ્ભુસુન્દરી ॥ ૯॥

એતૈર્વર્ણૈર્મહામાયા શમ્ભવી પાતુ મસ્તકમ્ ।
કકારે પાતુ માન્દેવી શર્વાણી હરગેહિની ॥ ૧૦॥

મકારે પાતુ માન્દેવી સર્વપાપપ્રણાશિની ।
કકારે પાતુ માન્દેવી કામરૂપધરા સદા ॥ ૧૧॥

કકારે પાતુ માન્દેવી શમ્બરારિપ્રિયા સદા ।
પકારી પાતુ માન્દેવી ધરાધરણિરૂપધૃક્ ॥ ૧૨॥

હ્રીઙ્કારી પાતુ માન્દેવી આકારાર્દ્ધશરીરિણી ।
એતૈર્વર્ણૈર્મહામાયા કામરાહુપ્રિયાઽવતુ ॥ ૧૩॥

મકારઃ પાતુ માન્દેવી સાવિત્રી સર્વદાયિની ।
કકારઃ પાતુ સર્વત્ર કલામ્બરસ્વરૂપિણી ॥ ૧૪॥

લકારઃ પાતુ માન્દેવી લક્ષ્મીઃ સર્વસુલક્ષણા ।
હ્રીં પાતુ માન્તુ સર્વત્ર દેવી ત્રિભુવનેશ્વરી ॥ ૧૫॥

એતૈર્વર્ણૈર્મહામાયા પાતુ શક્તિસ્વરૂપિણી ।
વાગ્ભવં મસ્તકમ્પાતુ વદનઙ્કામરાજિકા ॥ ૧૬॥

શક્તિસ્વરૂપિણી પાતુ હૃદયયન્ત્રસિદ્ધિદા ।
સુન્દરી સર્વદા પાતુ સુન્દરી પરિરક્ષતિ ॥ ૧૭॥

રક્તવર્ણા સદા પાતુ સુન્દરી સર્વદાયિની ।
નાનાલઙ્કારસંયુક્તા સુન્દરી પાતુ સર્વદા ॥ ૧૮॥

સર્વાઙ્ગસુન્દરી પાતુ સર્વત્ર શિવદાયિની ।
જગદાહ્લાદજનની શમ્ભુરૂપા ચ માં સદા ॥ ૧૯॥

સર્વમન્ત્રમયી પાતુ સર્વસૌભાગ્યદાયિની ।
સર્વલક્ષ્મીમયી દેવી પરમાનન્દદાયિની ॥ ૨૦॥

પાતુ માં સર્વદા દેવી નાનાશઙ્ખનિધિઃ શિવા ।
પાતુ પદ્મનિધિર્દેવી સર્વદા શિવદાયિની ॥ ૨૧॥

દક્ષિણામૂર્તિર્મામ્પાતુ ઋષિઃ સર્વત્ર મસ્તકે ।
પઙ્ક્તિશ્છન્દઃ સ્વરૂપા તુ મુખે પાતુ સુરેશ્વરી ॥ ૨૨॥

ગન્ધાષ્ટકાત્મિકા પાતુ હૃદયં શઙ્કરી સદા ।
સર્વસંમોહિની પાતુ પાતુ સઙ્ક્ષોભિણી સદા ॥ ૨૩॥

સર્વસિદ્ધિપ્રદા પાતુ સર્વાકર્ષણકારિણી ।
ક્ષોભિણી સર્વદા પાતુ વશિની સર્વદાવતુ ॥ ૨૪॥

આકર્ષિણી સદા પાતુ સં મોહિની સદાવતુ ।
રતિર્દેવી સદા પાતુ ભગાઙ્ગા સર્વદાવતુ ॥ ૨૫॥

મહેશ્વરી સદા પાતુ કૌમારી સર્વદાવતુ ।
સર્વાહ્લાદનકારી મામ્પાતુ સર્વવશઙ્કરી ॥ ૨૬॥

ક્ષેમઙ્કરી સદા પાતુ સર્વાઙ્ગસુન્દરી તથા ।
સર્વાઙ્ગયુવતિઃ સર્વં સર્વસૌભાગ્યદાયિની ॥ ૨૭॥

વાગ્દેવી સર્વદા પાતુ વાણિની સર્વદાવતુ ।
વશિની સર્વદા પાતુ મહાસિદ્ધિપ્રદા સદા ॥ ૨૮॥

સર્વવિદ્રાવિણી પાતુ ગણનાથઃ સદાવતુ ।
દુર્ગા દેવી સદા પાતુ બટુકઃ સર્વદાવતુ ॥ ૨૯॥

ક્ષેત્રપાલઃ સદા પાતુ પાતુ ચાવરિશાન્તિકા ।
અનન્તઃ સર્વદા પાતુ વરાહઃ સર્વદાવતુ ॥ ૩૦॥

પૃથિવી સર્વદા પાતુ સ્વર્ણસિમ્હાસનન્તથા ।
રક્તામૃતઞ્ચ સતતમ્પાતુ માં સર્વકાલતઃ ॥ ૩૧॥

સુરાર્ણવઃ સદા પાતુ કલ્પવૃક્ષઃ સદાવતુ ।
શ્વેતચ્છત્રં સદા પાતુ રક્તદીપઃ સદાવતુ ॥ ૩૨॥

નન્દનોદ્યાનં સતતમ્પાતુ માં સર્વસિદ્ધયે ।
દિક્પાલાઃ સર્વદા પાન્તુ દ્વન્દ્વૌઘાઃ સકલાસ્તથા ॥ ૩૩॥

વાહનાનિ સદા પાન્તુ અસ્ત્રાણિ પાન્તુ સર્વદા ।
શસ્ત્રાણિ સર્વદા પાન્તુ યોગિન્યઃ પાન્તુ સર્વદા ॥ ૩૪॥

સિદ્ધાઃ પાન્તુ સદા દેવી સર્વસિદ્ધિપ્રદાવતુ ।
સર્વાઙ્ગસુન્દરી દેવી સર્વદાવતુ માન્તથા ॥ ૩૫॥

આનન્દરૂપિણી દેવી ચિત્સ્વરૂપા ચિદાત્મિકા ।
સર્વદા સુન્દરી પાતુ સુન્દરી ભવસુન્દરી ॥ ૩૬॥

પૃથગ્દેવાલયે ઘોરે સઙ્કટે દુર્ગમે ગિરૌ ।
અરણ્યે પ્રાન્તરે વાપિ પાતુ માં સુન્દરી સદા ॥ ૩૭॥

ઇદઙ્કવચમિત્યુક્તં મન્ત્રોદ્ધારશ્ચ પાર્વતિ ।

યઃ પઠેત્પ્રયતો ભૂત્વા ત્રિસન્ધ્યન્નિયતઃ શુચિઃ ॥ ૩૮॥

તસ્ય સર્વાર્થસિદ્ધિઃ સ્યાદ્યદ્યન્મનસિ વર્તતે ।
ગોરોચનાકુઙ્કુમેન રક્તચન્દનકેન વા ॥ ૩૯॥

સ્વયમ્ભૂકુસુમૈઃ શુક્લૈર્ભૂમિપુત્રે શનૌ સુરે ।
શ્મશાને પ્રાન્તરે વાપિ શૂન્યાગારે શિવાલયે ॥ ૪૦॥

સ્વશક્ત્યા ગુરુણા યન્ત્રમ્પૂજયિત્વા કુમારિકાઃ ।
તન્મનુમ્પૂજયિત્વા ચ ગુરુપઙ્ક્તિન્તથૈવ ચ ॥ ૪૧॥

દેવ્યૈ બલિન્નિવેદ્યાથ નરમાર્જારસૂકરૈઃ ।
નકુલૈર્મહિષૈર્મેષૈઃ પૂજયિત્વા વિધાનતઃ ॥ ૪૨॥

ધૃત્વા સુવર્ણમધ્યસ્તઙ્કણ્ઠે વા દક્ષિણે ભુજે ।
સુતિથૌ શુભનક્ષત્રે સૂર્યસ્યોદયને તથા ॥ ૪૩॥

ધારયિત્વા ચ કવચં સર્વસિદ્ધિલભેન્નરઃ ।
કવચસ્ય ચ માહાત્મ્યન્નાહવર્ષશતૈરપિ ॥ ૪૪॥

શક્નોમિ તુ મહેશાનિ વક્તુન્તસ્ય ફલન્તુ યત્ ।
ન દુર્ભિક્ષફલન્તત્ર ન ચાપિ પીડનન્તથા ॥ ૪૫॥

સર્વવિઘ્નપ્રશમનં સર્વવ્યાધિવિનાશનમ્ ॥ ૪૬॥

સર્વરક્ષાકરઞ્જન્તોશ્ચતુર્વર્ગફલપ્રદમ્ ।
યત્ર કુત્ર ન વક્તવ્યન્ન દાતવ્યઙ્કદાચન ॥ ૪૭॥

મન્ત્રમ્પ્રાપ્ય વિધાનેન પૂજયેત્સતતં સુધીઃ ।
તત્રાપિ દુર્લભં મન્યે કવચન્દેવરૂપિણમ્ ॥ ૪૮॥

ગુરોઃ પ્રસાદમાસાદ્ય વિદ્યામ્પ્રાપ્ય સુગોપિતામ્ ।
તત્રાપિ કવચન્દિવ્યન્દુર્લભમ્ભુવનત્રયે ॥ ૪૯॥

શ્લોકવા સ્તવમેકવા યઃ પઠેત્પ્રયતઃ શુચિઃ ।
તસ્ય સર્વાર્થસિદ્ધિઃ સ્યાચ્છઙ્કરેણ પ્રભાષિતમ્ ॥ ૫૦॥

ગુરુર્દેવો હરઃ સાક્ષાત્પત્ની તસ્ય ચ પાર્વતી ।
અભેદેન યજેદ્યસ્તુ તસ્ય સિદ્ધિરદૂરતઃ ॥ ૫૧॥

ઇતિ શ્રીરુદ્રયામલે ભૈરવભૈરવીસંઆદે શ્રીભૈરવીકવચં

સમ્પૂર્ણમ્ ॥

Proofread by lalitha parameswari parameswari.lalitha at gmail.com

*Shri Bhairavi Kavacham*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*